भूमिको घटाया तब १२ रहे. इसको आधा किया तब ६ हुए. यही ऋणाबाधा है. इसप्रकार दोनो आबाधा ६।१५ हुई. इनही आबाधाओंसे लम्ब जाननेके लिये पहली भुज १० का वर्ग किया तब १०० हुए. इसी भुजकी आबाधा ६ का वर्ग किया तब ३६ हुए. इनका अन्तर किया तब ६४ बचे. इसका वर्गमूल लिया तब पहली आबाधासे लम्ब मिला ८। इसी प्रकार दूसरी भुज १७ का वर्ग किया तब २८९ हुए. इसी भुजकी आबाधा १५ का वर्ग किया तब २२५ हुए. इनका अन्तर किया तब ६४ बचे. इनका मूल लिया तब वही लम्बप्रमाण ८ मिला. इस प्रकार दोनों आबाधाओंसे एक ही लम्ब मिला. अब क्षेत्रफल जाननेको भूमिके आधे ४ $\frac{1}{2}$ को लम्ब ८ से गुणा किया तब ३६ मिले. यही क्षेत्रफल है. ॥

चतुर्भुजेऽस्पष्टत्रिभुजेचस्पष्टफलानयने करणसूत्रं

वृत्तम्- चतुर्भुजमें अस्पष्ट और त्रिभुजमें स्पष्ट फल जाननेकी रीति एक श्लोकमें:-

सर्वदोर्युतिदलञ्चतुःस्थितं बाहुभिर्विरहितंचतद्वधात्।
मूलमस्फुटफलंचतुर्भुजेस्पष्टमेवमुदितंत्रिबाहुके॥१९॥

अन्वयः- सर्वदोर्युतिदलम्। चतुःस्थितम्। कार्य्यम्। ततः। बाहुभिः। विरहितम्। च। कार्य्यम्। तद्वधात्। मूलम्। चतुर्भुजे। अस्पष्टम्। फलम्। भवति। एवम्। त्रिबाहुके। स्पष्टम्। फलम्। उदितम्॥ १९ ॥

अर्थः- सब भुजाओंका योगकर आधा करलेय. तब जो अङ्क हों उनको चार स्थानमें लिखे. फिर चार स्थानमें लिखेहुए अङ्कोंमें अलग अलग एक एक भुजको घटावे. जो शेष अङ्क हों उनका योग करे. फिर इसी योगका मूल लेय. वही चतुर्भुजक्षेत्रमें अस्पष्ट (ठीकनहीं) फलहोताहै. इसी रीतिसे त्रिभुजमें स्पष्ट (ठीक) फल

होताहै. ॥ १९ ॥

उदाहरणम्.

भूमिश्चतुर्दशमिता मुखमङ्कसङ्ख्यं बाहू त्रयोदश
दिवाकरसम्मितौच ॥ लम्बोऽपियत्ररविसङ्ख्य-
क एवतत्र क्षेत्रे फलंकथयतत्कथितंयदाद्यैः ॥१६॥

अन्वयः- यत्र । क्षेत्रे । चतुर्दशमिता । भूमिः । अङ्कसङ्ख्यम् । मुखम् । त्रयोदशदिवाकरसम्मितौ । च । बाहू । यत्र । लम्बः । अपि । रविसङ्ख्यकः । एव । तत्र । यत् । आद्यैः । कथितम् । तत् । फलम् । कथय ॥ १६ ॥

जिसक्षेत्रमें १४ भूमिहै. ९ मुखहै. १३ और १२ दोनों भुज है. और जहां लम्बभी १२ है. उसक्षेत्रमें जो प्राचीनोने कहाहै वहफल कहो ॥ १६ ॥

न्यासः । भूमिः १४ मुखम् ९ बाहू १३ । १२



लम्बः १२ उक्तवत्करणेन जातं क्षेत्रफलम् कर्णा २९८०० अस्याः पदं किञ्चिन्न्यूनमेकचत्वारिंशच्छतम् १४१ इदमत्र क्षेत्रे नवास्तवम्फलम् किन्तु "लम्बेन निघ्नं कुमुखैक्यखण्डमि" ति वक्ष्यमाणकरणेन वास्तवम्फलम् ॥ १३ ॥



फैलाव- ऊपरोक्त रीतिके अनुसार क्षेत्रफल जाननेके लिये सब भुजों ९ । १२ । १४ । १३ के योग ४८ को आधा २४ किया फिर इनको चार स्थानमें लिखा. फिर एकस्थानमें घटाया तब जो भुजोंका शेष रहा १५ । १२ । १० । ११ उनका परस्पर घात किया तब २९८०० हुए. इसका मूल क्षेत्रफल है. परन्तु

इसका पूरापूरा मूल मिल नहीं सक्ता. इसकारण यह करणीगत फल कहाता है. और इसका आसन्नमूल लिया तब कुछ कम १४१ मिला. परन्तु यह क्षेत्र फल ठीक

योगार्द्ध.	भुज	शेष.
२४	९	१५
२४	१२	१४
२४	१४	१०
२४	१३	११

नहीं है. परंतु आगे जो समलम्बचतुर्भुजक्षेत्रके फल लानेकी रीति लिखेंगे. "भूमि और मुखका योगकर आधा करलेय. और लम्बसे गुणा करदेय" उसी रीतिके अनुसार यहां भी भूमि १४ और मुख ९ का योगकर आधा किया तब $\frac{२३}{२}$ हुए. इनको लम्ब १२ से गुणा किया तब १३८ हुए. यही ठीक क्षेत्रफल है.

उसी क्षेत्रके दो खण्ड करके और रीतिसे क्षेत्र-फल लाते हैं.

ऊपरोक्त चतुर्भुजक्षेत्रमें लम्ब डालनेसे समचतुर्भुज बनता है. और एक त्रिभुज बनजाताहै. और चतुर्भुजके सम होनेसे मुख ९ के समानही भूमि ९ होजातीहै. शेष ५ त्रिभुजकी भूमि हो जाती है. तब त्रिभुजमें भुज ५ कोटि १२ कर्ण १३ होताहै. यहीं



भुज और कोटि ५।१२ का घात किया तब ६० हुए. इनका आधा किया तब ३० हुए. यही त्रिभुजका फल हुआ. फिर चतुर्भुजके भुज ९ और कोटि १२ का घात किया तब १०८ हुए. इन दोनोंका योग किया तब वही १३८ ठीक फल हुआ.

सर्वदोर्युतिदलमित्यादिना त्रिभुजे स्पष्टफलानयनाय अत्रत्रिभुजस्य पूर्वोदाहृतस्य न्यासः भूमिः १४ भुजौ १३।१५ अनेनापि प्रकारेण त्रिबाहुके तदेववास्तवंफलम् ८४ अत्र चतुर्भुजस्या स्पष्टमुदितम् ॥



फैलाव- सर्वदोरित्यादि ऊपर कही हुई रीतिसे त्रिभुजक्षेत्रमें स्पष्ट फल लानेके निमित्त यहां पूर्व उदाहरण दियेहुए ही त्रिभुजपर गणित करतेहैं. यहाँ तीनों भुजों १३। १५। १४ का योग किया तब ४२ हुए. इनको आधा २१ कर तीन स्थानमें लिखा. इनमेंसे अलग अलग एक एक भुजको घटाया तब क्रमसे शेष रहा ८।६।७ इनका घात किया तब ७०५६

योगार्द्ध.	भुज.	शेष.
२१	१३	८
२१	१५	६
२१	१४	७
६३	४२	२१

हुए. इनका मूल लिया तो मिले ८४ यही क्षेत्रफल हुआ और पहले जो क्षेत्रफल लायेथे यह उसीकी तुल्यहै. इसकारण यह स्पष्टफलहै चतुर्भुजका तो अस्पष्ट फल दिखाचुके हैं.

अथ स्थूलत्वनिरूपणार्थं सूत्रं सार्द्धवृत्तम्.

जिस रीतिके अनुसार चतुर्भुजका स्थूल आताहै. वह रीति पीछे कह आयेहैं. तहां जो स्थूलत्वहै उसके दिखानेको नियम लिखतेहैं.

चतुर्भुजस्यानियतौहि कर्णौ कथं ततोऽस्मिन्नियतम्फलं स्यात् ॥ प्रसाधितौ तच्छ्रवणौ यदाद्यैः स्वकल्पितौ तावितरत्र न स्तः ॥ २० ॥

अन्वयः- हि। चतुर्भुजस्य। कर्णौ। अनियतौ। ततः। अस्मिन्। फलम्। नियतम्। कथम्। स्यात्। यत्। आद्यैः। स्वकल्पितौ। तच्छ्रवणौ। प्रसाधितौ। तौ। इतरत्र। न। स्तः ॥ २० ॥

अर्थः- निश्चय है कि, चतुर्भुजमें कर्ण अनियत है. अर्थात् एकही क्षेत्रमें अनेक प्रकारके कर्ण होतेहैं. तिसकारण यहाँ नियत फल किसप्रकार होसक्ता है. और जो प्राचीनोने अपने अपने कल्पना किये हुए चतुर्भुजमें कर्णसाधन कियेहैं वह सब स्थानमें नही होसक्ते २०

तेष्वेवबाहुष्वपरौचकर्णावनेकधा क्षेत्रफलं ततश्च ॥

अन्वयः— तेषु। एव। बाहुषु। कर्णौ। अनेकधा। भवतः। ततः। क्षेत्रफलम्। च। अनेकधा। भवति ॥ २ ॥

अर्थः— उनही भुजाओंमें कर्ण अनेकप्रकारके होजातेहैं. तिसीसे क्षेत्रफलभी अनेकप्रकारका होताहै. ॥ १ ॥

चतुर्भुजेहि एकान्तरकोणावाकृष्यान्तः प्रवेश्यमानौ भुजौ तत्संसक्तं कर्णं संकोचयतः। इतरौ तु बहिः प्रसरन्तौ स्वकर्णं वर्द्धयत अत उक्तम् ' तेष्वेव बाहुष्वपरौच कर्णाविति ॥

अर्थः— चतुर्भुजक्षेत्रमें एक एक बीचका कोना छोडकर संमुखके दोनों कोणोंको खेचनेसे भीतरको घुसते हुए भुज अपनेसे मिले हुए अपने कर्णको संकुचित करतेहैं. और जो भुज खेचनेसे बाहरकों फैलतेहैं. वह अपने कर्णको बढातेहैं. इसीकारण ऊपर कहाहै. कि कर्णोंके अनेक प्रकार होनेसे फलभी अनेक प्रकारका होताहै. परन्तु भुज वही रहतेहैं. क्यों कि कोनोंके खैंचनेसे वह कर्ण तो बढेगा. और दूसरा कर्ण छोटा होगा. तो कर्ण अनेक प्रकारके होंगे. इसी कारण उसी क्षेत्रके फल भी बहुतरीतिके होंगे. ॥

लम्बयोः कर्णयोर्वैक मनिर्दिश्यापरः कथम् ॥
पृच्छत्यनियतत्वेऽपि नियतञ्चापि तत्फलम् ॥ १ ॥
सपृच्छकः पिशाचोवा वक्तावा नितरां ततः ॥
योनवेत्ति चतुर्बाहु क्षेत्रस्या नियतां स्थितिम् ॥ २ ॥

अन्वयः— अपरः। लम्बयोः। वा। कर्णयोः। एकम्। अनिर्दिश्य। अनियतत्वेऽपि। नियतम्। तत्फलम्। कथम्। पृच्छति ॥ १ ॥

सः। पृच्छकः। पिशाचः। वा। वक्ता। अपि। ततः। नितराम्। पिशाचः। यः। चतुर्बाहु क्षेत्रस्य। अनियताम्। स्थितिम्। न। वेत्ति ॥ २ ॥

अर्थः- जो चतुर्भुज क्षेत्रके फलका प्रश्न करनेवाला लम्ब या कर्ण एकभी विना कहे अनियत होनेपर भी चतुर्भुजका नियत फल बूझताहै वह पिशाचतुल्य है. यदि वक्ता उत्तर देनेको तयार हो तो वह प्रश्न करनेवालेसे भी बडा पिशाच है. क्यों कि जो चतुर्भुजकी अनियत फलकी स्थितिको नहीं जानताहै ॥ १ ॥

समचतुर्भुजायतयोः फलानयने करणसूत्रं सार्द्धश्लोकद्वयम्- समचतुर्भुज और आयतचतुर्भुजके फल लानेकी रीति ढाईश्लोक.

इष्टाश्रुतिस्तुल्यचतुर्भुजस्य कल्प्याच तद्वर्गविवर्जिताया ॥ २१ ॥ चतुर्गुणा बाहुकृतिस्तदीयं मूलं द्वितीयश्रवणप्रमाणम् ॥ अतुल्यकर्णाभिहतिर्द्विभक्ता फलं स्फुटं तुल्यचतुर्भुजे स्यात् ॥ ॥ २२ ॥ समश्रुतौ तुल्यचतुर्भुजे च तथाऽऽयते तद्भुजकोटिघातः ॥ चतुर्भुजेऽन्यत्र समानलम्बे लम्बेननिघ्नं कुमुखैक्यखण्डम् ॥ २३ ॥

अन्वयः- तुल्यचतुर्भुजस्य । इष्टा । श्रुतिः । कल्प्या । तद्वर्गविवर्जिता । या । चतुर्गुणा । बाहुकृतिः । तदीयम् । मूलम् । ग्राह्यम् । तत् । द्वितीयश्रवणप्रमाणम् । भवेत् । अतुल्यकर्णाभिहतिः । द्विभक्ता । कार्य्या । तदा । फलम् । तुल्यचतुर्भुजे । स्फुटम् । स्यात् । समश्रुतौ । तुल्यचतुर्भुजे । तथा । आयते । चतुर्भुजे । च । तद्भुजकोटिघातः । फलम् । स्यात् । अन्यत्र । समानलम्बे । क्षेत्रे । कुमुखैक्यखण्डम् । लम्बेन । निघ्नम् । फलम् । भवतिऽऽ॥ २२ । २३ ॥

अर्थः- समचतुर्भुजक्षेत्रमें एक इष्ट कर्ण कल्पना करै. फिर कल्पना किये हुए कर्णका वर्ग करनेसे जो अङ्क हों उनको चार४से गुणाकिये हुए भुजके वर्गमें घटावै. जो शेष रहै उसका मूल लेय वह दूसरा कर्ण

होता है. चतुर्भुजमें अतुल्य कर्णोंका घातकर जो अङ्क हों उनमें दोका भाग देय तब जो फल मिलता है वह तुल्यचतुर्भुज स्पष्ट फल होगा. समकर्ण तुल्यचतुर्भुजमें तथा समकर्ण आयत चतुर्भुजमें उस क्षेत्रकी भुजकोटिका घात करनेसे क्षेत्रफल होता है. और समानलम्ब विषम चतुर्भुजमें पृथ्वी और मुखका योगकर आधा करलेय. तब जो अङ्क हों उनको लम्बसें गुणा करदेय. तब क्षेत्रफल मिलता है.॥ ऽऽ ॥ २२ ॥ २३ ॥

अत्रोद्देशकः- समचतुर्भुज, समकर्णचतुर्भुज तथा आयत चतुर्भुजका उदाहरण-

क्षेत्रस्य पञ्चकृतितुल्यचतुर्भुजस्य कर्णौ ततश्च गणितं गणक प्रचक्ष्व ॥ तुल्यश्रुतेश्च खलु तस्य तथायतस्य यद्विस्तृती रसमिताष्टमितञ्च दैर्घ्यम् ॥ १७ ॥

अन्वयः हेगणक! पञ्चकृतितुल्यचतुर्भुजस्य । क्षेत्रस्य । कर्णौ । ततः । गणितम् । च । प्रचक्ष्व । तथा । तुल्यश्रुतेः । गणितम् । प्रचक्ष्व । खलु । यद्विस्तृतिः । रसमिता । दैर्घ्यम् । च । अष्टमितम् । तस्य । आयतस्य । च । गणितम् । प्रचक्ष्व ॥ १७ ॥

अर्थः- हेगणक! पांचका वर्ग अर्थात् २५ तुल्य चारों भुजावाले चतुर्भुजक्षेत्रके दोनों कर्ण और क्षेत्रफलभी कहो तथा समकर्ण समचतुर्भुजका क्षेत्रफल कहो. और जहां चौडाई ६ है और लम्बाई ८ आठ है उस समकर्ण आयतचतुर्भुजकाभी क्षेत्रफल कहो ॥१॥१७

प्रथमोदाहरणे न्यासः भुजाः २५ । २५ । २५ । २५



अत्र त्रिंशन्मितामेकां ३० श्रुतिं प्रकल्प्य यथोक्तकरणेन जाताऽन्याश्रुतिः ४० फलम् ६००

फैलाव- इसक्षेत्रमें चारों भुजका प्रमाण पच्चीस पच्चीस है. यहाँ कर्ण जाननेको तथा क्षेत्रफल जाननेको ऊपरोक्त नियमानुसार ३० को इष्ट कर्ण कल्पना किया. फिर इस कर्ण ३० का वर्ग किया तब ९०० हुए. इनको भुज२५के वर्ग६२५को चार४से गुणा करनेपर जो अङ्क हुए २५०० इनमेसे घटाया तब १६०० शेष रहे. इसका मूल लिया तब ४० मिले. यही यहां दूसरा कर्ण है. अब इन कर्णोंको जानकर ऊपरोक्त नियमानुसार दोनों कर्णोंका ३०।४० घात किया तब १२०० हुए. इनमें दो२का भाग दिया तब ६०० लब्धि हुए. यही यहां क्षेत्रफल है.॥

न्यासः अथवा चतुर्दशमितामेकां १४ श्रुतिं प्रकल्प्योक्तवत्करणेन जातान्या श्रुतिः ४८ फलञ्च ३३६ ॥

अथवा- १४ को इष्टकर्ण माना. फिर पूर्वरीतिके अनुसार इसमाने हुए कर्णका वर्ग किया. १९६ हुए. इनको भुज २५के वर्ग ६२५को चार४से गुणाकरनेपर जो अङ्क हुए२५०० इनमें घटाया तब २३०४ बचे. इनका मूल लिया तब ४८ मिले. यही दूसरे कर्णका प्रमाण है. अब क्षेत्रफल जाननेके निमित्त पूर्वोक्त रीतिके अनुसार साधेहुये दोनों कर्णों १४।४८का घात किया तब ६७२ हुए. इनमें दोका भाग दिया तब ३३६ लब्धि हुए. यही यहां क्षेत्रफल है. इसी रीतिसे जैसे कर्णको इष्ट मानोगे वैसेही अनेक प्रकारके कर्ण होंगे. और कर्णोंके अधीन क्षेत्रफलभी अनेक होंगे. परन्तु भुज वही रहेंगे. ॥

द्वितीयोदाहरणे न्यासः

तत्कृत्योयोगपदं कर्णइति जाता करणीगताश्रुति

रुभयत्र तुल्यैव १२५० ग

गणितञ्च ६२५ ।

दूसरे- समकर्णचतुर्भुजके उदाहरणमें क्षेत्रफल जाननेके निमित्त तथा कर्ण जाननेके निमित्त पहले कहीहुई रीतिके अनुसार अर्थात् "तत्कृत्योर्योगपदं कर्ण" इसरीतिसे भुज २५ कोटि २५ के वर्गो ६२५। ६२५ का योग किया तब १२५० हुए. इनका मूल कर्णप्रमाण होना चाहिये. परन्तु यही ठीक मूल नहीं मिलता. इसकारण यह १२५० करणीगत कर्ण हुआ. दोनों स्थानमें कर्णकोटिका प्रमाण समान ही है. इस कारण कर्णप्रमाण भी दोनों स्थानमें समानही होगा. अर्थात् दोनों कर्णका प्रमाण १२५० होगा. अब क्षेत्रफल जाननेके निमित्त ऊपर कहीहुई "तद्भुजकोटिघातः" रीतिके अनुसार समकर्ण होनेसे भुज २५ कोटि २५ का घात किया. तब ६२५ हुए. यही क्षेत्रफल हुआ. ॥





अथायतस्य न्यासः ॥

विस्तृतिः ६ दैर्घ्यम् ८

अस्य गणितम् ४८ ।

अब आयतचतुर्भुजका फल जाननेके निमित्त ऊपर कहीहुई रीतिके अनुसार भूमि ८ और मुख८का योग किया तब १६ हुए. इनको आधा किया तब ८ आठ रहे. इनको लम्ब६से गुणा किया तब ४८ हुए. यही क्षेत्रफल हुआ. यहां लम्ब समान था. इसकारण 'लम्बेन



निघ्नंकुमुखैक्य खण्डम्" इसरीतिसे क्षेत्रफल लाये हैं. यहां "तत्कृत्यो र्योगपदं कर्णः" इसरीतिसे कर्ण जानकर भी समकर्ण होनेसे "तद्भुजकोटिघातः" इस रीतिसेभी क्षेत्रफल मालूम होजाताहै. जैसे भुज ८ कोटि ६ इनके वर्ग ६४।३६ का योग किया तब १०० हुए. इनका मूल लिया तब १० मिले. भुजकोटि समान होनेसे दोनो कर्ण समान १०।१० ही होंगे. इसकारण समकर्ण होनेसे भुजकोटिका घात करनेसे भी वही ४८ क्षेत्रफल होगा.

उदाहरणम्.

क्षेत्रस्य यस्य वदनं मदनारितुल्यं विश्वम्भरा द्विगुणि-
तेन मुखेन तुल्या ॥ बाहू त्रयोदशनखप्रमितौ च लम्बः
सूर्योन्मितश्च गणितं वद तत्र किं स्यात् ॥ १८ ॥

अन्वयः- हेगणक!। यस्य। क्षेत्रस्य। वदनम्। मदनारितुल्यम्। द्विगुणितेन। मुखेन। तुल्या। विश्वम्भरा। त्रयोदशनखप्रमितौ च बाहू। सूर्योन्मितः। च। लम्बः। तत्र। गणितम्। किम्। स्यात्। इति। वद॥

अर्थः- हेगणक! जिस क्षेत्रका मुख तो ११ है. द्विगुणित मुखके समान अर्थात् २२ भूमि है. और १३ और २० प्रमाण दोनों भुज हैं. तथा सूर्य्यसंख्यक अर्थात् १२ लम्ब है. तहां क्षेत्रफल क्या होगा सो कहो?॥१८॥

न्यासः



वदनम् ११ विश्वम्भरा २२ बाहू १३।२० लम्बः १२ अत्र "सर्वदोर्युति दल" मित्यादिना स्थूलफलम् २५० वास्तवं तु "लम्बेन निघ्नंकुमुखैक्यखण्ड" मितिजातम्फलम् १९८ क्षेत्रस्य खण्डत्रयम् कृत्वा फलानि पृथगानीय खण्डत्रयदर्शनम्

न्यासः:— प्रथमस्य भुजकोटिकर्णाः ५।१२।१३



द्वितीयस्यायतस्य विस्तृतिः ६ दैर्घ्यम् १२ तृतीयस्य भुजकोटिकर्णाः १६।१२।२० अत्र त्रिभुजयोः क्षेत्रयोः भुजकोटिघातार्धम्फलम् । आयते चतुरस्रे क्षेत्रे तद्भुजकोटिघातः फलम् । यथा प्रथमक्षेत्रे फलम् ३० द्वितीये ७२ तृतीये ९६ एषामैक्यं सर्वक्षेत्रफलम् १९८ जातम् ।



फैलाव- मुख ११ भूमि २२ दोनों भुज १३।२० लंब १२ अब इस उदाहरणमें "सर्वदोरित्यादि" रीतिसे सब भुजों ११।२०।२२।१३ का योग किया तब ६६ हुए. इनको आधा ३३ कर चार ४ स्थानमें लिखा. फिर अलग२ एक एक स्थानमें सब भुजोंको घटाया तब जो शेषाङ्क हुए उनका परस्पर घात किया

योगार्द्ध.	भुज.	शेष.
३३	११	२२
३३	२०	१३
३३	२२	११
३३	१३	२०
		६६

तब ६२९२० हुए. इनका मूल लिया तब कुछ कम २५० मिला. परन्तु यह ठीक नहीं. ठीक जाननेके निमित्त "लम्बेननिघ्नमित्यादि" इसरीतिसें फल लाये. अर्थात् मुख ११ और भूमि २२ इनको जोडा तब ३३ हुए. इनको आधा किया तब $\frac{३३}{२}$ हुए. इनको लम्ब १२ से गुणा किया तब हुए १९८ यही ठीक क्षेत्रफल हुआ.



अब क्षेत्रके तीन खण्ड करके अलग२ क्षेत्रफल लाकर तीनों खण्डोंपर गणित दिखलाते हैं. यहां प्रथम खण्डमें भुज ५ कोटि १२ कर्ण १३ है. । दूसरे खंडमें विस्तार ६ लम्बापन १२ है. । तीसरे खंडमें भु० १६ को० १२ कर्ण २० है.

पहले त्रिभुजक्षेत्रमें फल लानेकेलिये ५।१२ भुजकोटिका घात किया तब ६० हुए. इनको आधा किया तब ३० हुए. यही प्रथम क्षेत्रका फल है. द्वितीयखण्ड आयत चतुर्भुजमें भुज ६ कोटि १२ का घात किया तब ७२ हुए. यही क्षेत्रके द्वितीय खण्डका फल है. तृतीय खण्ड जात्यत्रिभुजके भुज १६ कोटि १२ का घात किया तब १९२ हुए. इनका आधा किया तब ९६ हुए. यही तृतीय खण्डका क्षेत्रफल हुआ. इसप्रकार तीनों खण्डोंके फल ३०।७२।९६ को जोडनेसे वही १९८ क्षेत्रफल हुआ.

अथान्यदुदाहरणम्- और उदाहरण दिखाते हैं:-

पञ्चाशदेकसहिता वदनं यदीयं भूः पञ्चसप्तति मिता प्रमितोऽष्टषष्ट्या ॥ सव्योभुजो द्विगुणविंशतिसम्मितोऽन्यस्तस्मिन् फलं श्रवणलम्बमिती प्रचक्ष्व ॥ १९ ॥

अन्वयः- एकसहिता । पञ्चाशत् । यदीयम् । वदनम् । पञ्चसप्तति मिता । भूः । अष्टषष्ट्या । प्रमितः । सव्यः भुजः । द्विगुणविंशतिसम्मितः । अन्यः भुजः । तस्मिन् । फलम् । श्रवणलम्बमिती । च । प्रचक्ष्व ॥ १९ ॥

अर्थः- ५१ इक्यावन जिस क्षेत्रका मुख है. ७५ प्रमाण भूमि है. ६८ प्रमाण दायां भुज है. ४० प्रमाण बांयां दूसरा भुज है. उस क्षेत्रमें फल और कर्ण तथा लम्बका प्रमाणभी कहो ॥ १९ ॥



न्यासः

वदनम् ५१
भूमिः ७५
भुजौ ६८ । ४०

यहां मुख ५१ है. भूमि ७५ है. दोनो भुज ६८।४० हैं.

SRI RAMAKRISHNA ASHRAMA LIBRARY. SRINAGAR. Accession No. 5391 Date

अत्र फलावलंबश्रुतीनांसूत्रंवृत्तार्द्धं ऊपर दिखाये हुए क्षेत्रमें फल, लम्ब और कर्णके विषयमें सूत्र आधा श्लोक ॥

ज्ञातेऽवलम्बेश्रवणः श्रुतौतुलम्बः फलंस्यान्नियतंतुतत्र ॥ ऽऽ

कर्णस्यानियतत्वाल्लम्बोऽप्यनियत इत्यर्थः ॥

अन्वयः- अवलम्बे । ज्ञाते । श्रवणः । ज्ञातः । स्यात् । श्रुतौ । ज्ञातायाम् । तु । लम्बः । ज्ञातः । स्यात् । तत्र । फलम् । तु । नियतम् । स्यात् ॥ ऽऽ ॥

नियत लम्ब जाननेसे नियतकर्ण ज्ञात होताहै, नियतकर्ण जाननेपर नियत लम्ब ज्ञात होताहै. अर्थात् लम्ब जाननेसे कर्ण जानाजाता है. और कर्ण जाननेसे लम्ब जाना जाताहै. और लंब या कर्णके नियत होनेसे फलभी नियत होताहै. और यदि कर्ण सन्मुख दोनों कोणोंके खेंचैनेसे अनियत होतो लम्बभी अनियत होता है. और कर्णोंके ही अ-



नियत होनेसे एकही क्षेत्रके अनेक रूप हो जातेहैं. बुद्धिमान् इस रूपभेदकी परीक्षा रस्सीका क्षेत्राकार बनाकर प्रत्यक्षकर सक्ता है.

लम्बज्ञानाय करणसूत्रं वृत्तम्- चतुर्भुजमें लम्बके जाननेकी रीति एक श्लोकमें ॥

चतुर्भुजान्तस्त्रिभुजेऽवलम्बः प्राग्वद्भुजौ कर्ण-भुजौ महीभूः ॥ २४ ॥

अत्र लम्बज्ञानार्थं सव्यभुजाग्राद्दक्षिणभुजमूलगामी इष्टः कर्णः सप्तसप्ततिमितः कल्पितस्तेन चतुर्भुजा-

न्तस्त्रिभुजं कल्पितं तत्राऽसौ कर्णः एको भुजः ७७ द्वितीयस्तु सव्यभुजः ६८ भूः सैव ७५ अत्र प्राग्वल्लब्धो लम्बः $\frac{३०८}{५}$

फैलाव- चतुर्भुजके भीतर जो जात्यत्रिभुजहै. उसमें लम्ब डालै. कर्ण और भुजको भुजाएं मानै महीको पृथ्वी जानै.

यहाँ लम्ब जानना होतो वांई भुजके अग्रभागसे रेखाको दक्षिणभुजके मूलमें पहुंचा देय. उसी लम्बको इष्टकर्णकल्पना ७७ सत्तहतर किया उसीसे चतुर्भुजके भीतर एकत्रिभुज बनाया. उसमें यही कल्पित कर्ण ७७ एक भुज हुआ. दूसरा सव्य भुज ६८ है. भूमि वही ७५ है. यहाँ पहले कही हुई "त्रिभुजे भुजयोर्योगं इत्यादि" रीतिसे आबाधा जाननेके लिये दोनों ७७।६८ भुजोंका योग किया तब १४५ हुए. उनही भुजाओंके अन्तर९ सेगुणा किया तब १३०५ हुए. इनमें भूमि ७५का भाग दिया. इत्यादि क्रिया करनेसे दोनोआबाधा $\frac{२३१}{५}$ $\frac{१४४}{५}$ मिली. इनही आबाधाओंपरसे लंब मिला. $\frac{३०८}{५}$



लम्बे ज्ञाते कर्णज्ञानार्थंसूत्रं वृत्तम्- लम्ब जानकर कर्ण जाननेकी रीति श्लोक एक.

यल्लंबलंबाश्रितबाहुवर्गविश्लेषमूलं कथिताऽबधासा तदूनभूवर्गसमन्वितस्य यल्लंबवर्गस्य पदंसकर्णः॥ २५॥

अन्वयः- यत्। लम्बलम्बाश्रितबाहुवर्गविश्लेषमूलम्। सा। अबधा। कथिता। तदूनभूवर्गसमन्वितस्य। लंबवर्गस्य। यत्। पदम्। सः। कर्णः॥२५॥

अर्थः- लंब और लम्बको आश्रय करनेवाला भुज इन दोनोंके वर्गान्तरका मूल आबाधाका प्रमाण होताहै. लम्बके प्रमाणसे हीन जो भू-

मिके वर्गयुक्त लंबका वर्ग उसका जो मूल सो कर्ण है ॥ २५ ॥

अत्र सव्यभुजाग्राल्लम्बः किल कल्पितः $\frac{३०८}{५}$ अतो जाताबाधा $\frac{१४४}{५}$ तदून भूवर्गसमन्वितस्येत्यादिना जातः कर्णः ७७

अर्थः- दाईं भुजके अग्रभागसे डाला हुआ लम्ब $\frac{३०८}{५}$ है. इससे आबाधाहुई $\frac{१४४}{५}$ "तदून भूवर्गसमन्वितस्येत्यादि" रीतिसे कर्णका प्रमाण हुआ ॥ ७७ ॥

द्वितीयकर्णज्ञानार्थं सूत्रं वृत्तद्वयम्-॥ दूसरा कर्ण जाननेके लिये रीति दो श्लोक.

इष्टोऽत्र कर्णः प्रथमं प्रकल्प्य त्र्यस्त्रे तु कर्णोभयतः स्थिते ये ॥ कर्णं तयोः क्ष्मामितरौ च बाहू प्रकल्प्य लम्बावबधे प्रसाध्ये ॥ २६ ॥ आबाधयोरेककुकुप्स्थयोर्यत्स्यादन्तरं तत्कृतिसंयुतस्य ॥ लम्बैक्यवर्गस्य पदं द्वितीयः कर्णो भवेत्सर्वचतुर्भुजेषु ॥ २७ ॥

अन्वयः- प्रथमम् । अत्र । इष्टः । कर्णः । प्रकल्प्यः । कर्णोभयतः । तु । ये । त्र्यस्त्रे । स्थिते । तयोः । कर्णम् । क्ष्माम् । प्रकल्प्य । इतरौ । च । बाहू । प्रकल्प्य । लम्बावबधे । प्रसाध्ये ॥ २६ ॥

सर्वचतुर्भुजेषु । एककुप्स्थयोः । आबाधयोः । यत् । अन्तरम् । स्यात् । तत्कृतिसंयुतस्य । लम्बैक्यवर्गस्य । पदम् । द्वितीयः । कर्णः । भवेत् ॥ २७ ॥

अर्थः- पहले यहां इष्टकर्ण कल्पना करै. कर्णके दोनो ओर जो दो जात्य त्रिभुज स्थितहैं. उनके कर्णको भूमि कल्पना कल्पना करके तथा और दोनोको भुजकल्पना करके लम्ब और आबाधा साधै. ॥२६॥ सब चतुर्भुजक्षेत्रोंमें एक दिशामें स्थित्त आबाधाओंका

जो अन्तर हो उसके वर्गसे युक्त लम्बयोगके वर्गका मूल लेय. वही दूसरा कर्ण होगा ॥ २७ ॥

न्यासः



तत्र चतुर्भुजे सव्यभुजाग्राद्दक्षिणभुजमूलगामिनः कर्णस्य मानं कल्पितम् ७७ तत्कर्णरेखावच्छिन्नस्य क्षेत्रस्य मध्ये कर्णरेखोभयतो ये त्र्यस्रे उत्पन्ने तयोः कर्णः भूमिस्तदितरौच भुजौ प्रकल्प्य प्राग्वल्लम्ब आबाधा च साधिता । तद्दर्शनम् । लम्बः ६० द्वितीय लम्बः २४ आबाधयो ४५।२३ रेककुप्स्थयोरन्तरस्य १३ कृते १६९ लम्बैक्य ८४ कृतेश्च ७०५६ योगः-७२२५ तस्यपदम् द्वितीय कर्णप्रमाणम् ८५ ॥

फैलाव- तिसी चतुर्भुज क्षेत्रमें वांई भुजाके अग्रभागसे दक्षिण भुजके मूलमें जानेवाले कर्णका प्रमाण कल्पना किया. ७७ . उस कर्णकी रेखायुक्त क्षेत्रके मध्यमें कर्णकी रेखाकी दोनों ओर जो दो जात्य त्रिभुजहैं उनके कर्णको भूमि जानना. तदितर रेखाओंको भुज जानना. और पहले कही हुई रीतिसे लम्ब और आबाधा सिद्ध होतीहै वही दिखातेहैं. लम्बप्रमाण ६० दूसरे लम्बका प्रमाण २४ दोनो आबाधा ४५।२५ एक दिशामें स्थित आबाधाओंके अंतर १३ का वर्ग किया तब १६९ लम्ब योग ८४ इसका वर्ग ७०५६ अन्तरके और लम्बयोगके वर्गों १६९ ।७०५६ का योग ७२२५ इसका मूल ८५ हुआ. यही दूसरे कर्णका प्रमाण है. ॥

अत्रेष्टकर्णकल्पने विशेषोक्ति सूत्रं सार्द्धवृत्तम् .

इसचतुर्भुजमें इष्टकर्ण कल्पना करनेकी विशेष रीति डेढश्लोकमें:-

कर्णाश्रितं स्वल्पभुजैक्यमुर्वी प्रकल्प्य तच्छेष-
मितीच बाहू ॥ साध्योवलम्बोऽथ तथान्यक-
र्णः स्वोर्व्याः कथंचिच्छ्रवणोन दीर्घः ॥ २८ ॥
तदन्यलम्बान्न लघुस्तथेदं ज्ञात्वेष्टकर्णः सुधिया
प्रकल्प्यः ॥ ९९ ॥

अन्वयः- कर्णाश्रितम् । स्वल्पभुजैक्यम् । उर्वीम् । प्रकल्प्य । तच्छेषमिती । च । बाहू । प्रकल्प्य । साध्यः । अथ । अन्यकर्णः । तथा । प्रकल्प्यः । यथा । श्रवणः । स्वोर्व्याः । दीर्घः । न । स्यात् । तथा । तदन्यलम्बात् । कथञ्चित् । अपि । लघुः । न । स्यात् । सुधिया । इदम् । ज्ञात्वा । इष्टकर्णः । प्रकल्प्यः ॥ २८ ॥ ९९ ॥

अर्थः- कर्णका आश्रय करनेवाली छोटी भुजाओंके योगको भूमि कल्पना करै. उससे बाकी वची रेखाओंकी भुज कल्पना करै. फिर लम्ब साधन करै. दूसरा कर्ण इसप्रकार कल्पना करै जैसे कर्ण अपनी भूमिसे अधिक नहो. और लम्बसे किसी प्रकार न्यून नहो. बुद्धिमान् यह जानकर इष्टकर्णकल्पना करै ॥ २८ ॥ ९९ ॥

आशय यहहै कि, विषमचतुर्भुजमें जिन इच्छित कर्णोंकी कल्पना करनेसे चतुर्भुजका स्वरूप न बिगडे, उन कर्णोंको न्यूनसे न्यून और बडेसे बडा करनेकी यह रीति है कि, जिस कर्णको कल्पना किया चाहतेहैं उसके दोनों और जो दो दो भुज हैं उनका अलग अलग योग करै. उनही दोनों योगोंमें जो योग स्वल्पहो उससे भी न्यून कर्णइष्ट कल्पना करै तो चतुर्भुजका रूप ठीक रहेगा. । उसही स्वल्पयोगके तुल्य इष्ट कर्ण कल्पना करनेसे चतुर्भुज बनाया जाय तो अक्षेत्र होजायगा. ॥ आशय यहहैकि, कर्णको बडा करनेकी मर्य्यादा तहांतक है. जहांतक पहले जो दोनो योगकर आये हैं, उनमें जो छोटा योगहै उससे कुछ छोटा हो ॥ और छोटेसे छो-

टा करनेकी मर्य्यादा तहांतक है. जहांतक जिसकर्णको जाना चाहतेहैं उससे दूसरे कर्णके आसपास जो दो दो भुजहैं. उनका योग करै और योगोंमें जो छोटा हो उसको भूमि मानै और उस भूमिमें जहां भुजोंका योग हुआहै वहां चिह्न करदेय. शेष दो२ भुजोंको भुज मानै तब त्रिभुजकी कल्पित आकृति बनतीहै। तब इसी त्रिभुजमें पहले कही हुई रीतिसे आबाधा और लंब साधे. आबाधा और उधरहीकी भूमिका जो भुजहै. उसका अन्तर करनेसे जो अङ्क मिलै उनके वर्गमें लम्बका वर्ग जोड देय. तब जो अङ्क हों उनका मूल कर्णहोताहै. परंतु इतना कर्ण कल्पना करनेसे त्रिभुज हो जायगा. और यदि इससे कुछ अधिक कर्ण कल्पना किया जायतौ चतुर्भुजका स्वरूप बना रहेगा. ॥

चतुर्भुजे हि एकान्तरकोणावाक्रम्य संकोच्यमानं त्रिभुजत्वं याति तत्रैक कोणे लग्नलघुभुजयोरैक्यं भूमिरितरौ भुजौ प्रकल्प्य साधितं सच लम्बादूनः सङ्कोच्यमानः कर्णः कथञ्चिदपि न स्यात्तादितरो भूमेरधिको न स्यादेवमुभयत्राऽपि तदनुक्तमपि बुद्धिमता ज्ञायते ॥

इसका वही अभिप्राय है जो कि, अभी ऊपर सूत्रका कह चुके हैं. बुद्धिमान् कार्य्यवश वे दिखाई बातभी जानसक्ता है. ॥

ऊपर कहेहुए विषयको पहले जो विषम चतुर्भुज क्षेत्र कह आयेहै उसमें बायें भुजके अग्रभागसे दाहिने भुजके मूलतक जो कर्ण है उसको बडा कहां पर्यन्त कल्पना करै और उससे हो छोटा कहांतक करै सो दिखातेहैं. यहां जिसकर्णको कल्पना करैगे



उसकी दोनो और दोदो भुजहै. एक औरतौ दोभुज ६८।७५ यह है.

इनका योग किया तब १४३ हुए. दूसरी ओर दो भुज ५१। ४० यह हैं इनका योग किया तब ९१ हुए. इन दोनो योगों १४३। ९१ मे छोटा ९१ है. इष्ट कर्ण इस लघुयोगसे भी कुछ न्यून कल्पना करै तब चतुर्भुजका स्वरूप नहीं बिगडैगा. और यदि छोटे योगके तुल्यही इष्ट कर्ण कल्पना किया जाय तो त्रिभुज हो जायगा. क्यों कि छोटे दोनों भुज खैंचके कर्णमें मिलजायँगे. जैसे कि:—





लघुयोगके तुल्य इष्ट कर्णकल्पना करनेसे बिगड़ा हुआ चतुर्भुजकास्वरूप.

और जब चतुर्भुजके रूप न विगाडकर छोटेसे छोटा इष्ट कर्णकल्पना करना चाहतेहैं. तब यहां जो इष्टकर्णसे अन्य कर्ण है उसकी दोनों ओर दो दो भुजहैं. एक ओरकी दोनों भुज ६८।५१ है इनका योग किया तब ११९ हुए. दूसरी ओरकी दोनो भुज ७५। ४० हैं. इनका योग किया तब ११५ हुए. यहाँ दोनो योगों ११९। ११५ में छोटा योग ११५ है. इसको भूमि कल्पना किया और जिस स्थानपर भूमिमें भुजोंका योग हुआ है तहां चिन्ह कर देय.



और बाकी दो भुजोंको भुज माने तब त्रिभुजका रूप बन जायगा वह यहहै.

इस क्षेत्रमें पहली रीतिसे आबाधा मिलीं $\frac{७६२४}{११५}$ $\frac{५६०१}{११५}$ इन दोनोंमें बडी आबाधा बडी भुजकी ओरकी है. और छोटी आबाधा

छोटी भुजकी ओरकी है. अपनी आबाधा और भुजका अन्तर करनेसे हुआ ३०२७०२४/१३२२५ इनका मूल लिया तो लम्बका प्रमाण मिले. परन्तु यहां ठीक मूल मिल नहीं सक्ता. इसकारण करणीगत अर्थात् लम्बका वर्गरूपही लम्ब रहा.

तब क्षेत्रका आकार.

लम्बवर्ग ३०२७०२४/१३२२५



अब यहां कर्णका प्रमाण जाननेके लिये एक ओरकी आबाधा और भूमिगत भुज ७६२४/११५, ७५/१ इन दोनोंका तथा दूसरी ओरकी आबाधा और उसी ओरकी भुज ५६०१/११५, ४०/१ इन दोनोका भी अन्तर किया तब १००१/११५ मिला. यह अन्तर दोनो ओरसे एकसाही मिलताहै. इस अंतरके वर्ग १००२००१/१३२२५ को लम्बके वर्ग ३०२७०२४/१३२२५ में जोडा तब हुए योगाङ्क ४०२९०२५/१३२२५ इसका मूल कर्णका प्रमाण होता है. परन्तु यहाँ ठीक मूल मिलता नहीं, इसकारण यही करणीगत कर्ण है. परन्तु यहाँ मूलके समीपका अङ्क मालूम होसक्ता है. इसकारण कही हुई "वर्गेण महतेष्टेनेत्यादि" रीतिके अनुसार आसन्नमूल लैनेके लिये छेद १३२२५ और अंश ४०२९०२५ का घात किया तब ५३२८३८५५६२५ हुए. इससे वर्गरूप बडे इष्ट १०००० से गुणा किया तब हुए ५३२८३८५५६२५०००० इनका मूल लिया तब मिले २३०८३२९६ इसमें गुणक इष्टके मूल १०० और हर १३२२५ इनके घात १३२२५०० का भाग दिया तब १७ ६००७९६/१३२२५०० यह कर्णके समीपका अङ्क है. अर्थात् इससे कुछ जादा कर्णका प्रमाण है. यदि इससे बडा कर्ण किया जाय तब चतुर्भुजका स्वरूप बनारहेगा. और इतना कर्ण करनेमें त्रिभुज होजायगा और

चतुर्भुज अक्षेत्र होजायगा. अर्थात् ठीक विषम चतुर्भुज रखकर यदि छोटेसे छोटा कर्णकल्पना करना होतो १७ $\frac{६००७९६}{१३२२५}$ इससे कुछ बडा करै. इसी कर्णको बडेसे बडा करनेकी रीति तो पहले लिखही चुकेहैं कि यह ९१ कर्ण बडेसे बडे कर्णसे कुछ न्यूनहै. इसी प्रकार दूसरा कर्णभी कल्पना करलैना योग्य है.

विषमचतुर्भुजे फलानयनाय करणसूत्रं वृत्तार्द्धम्.

विषमचतुर्भुजमें फल लानेकी रीति आधा श्लोकमें:-

त्र्यस्त्रे तु कर्णोभयतः स्थिते ये तयोः फ-
लैक्यं फलमत्र नूनम् ॥ २९ ॥

अन्वयः- नूनम् । अत्र । ये । त्र्यस्त्रे । कर्णोभयतः । स्थिते । तयोः । फलैक्यम् । फलम् । स्यात् ॥ २९ ॥

अर्थः- निश्चय है कि, इसविषम चतुर्भुज क्षेत्रमें कर्णकी दोनो ओर जो जात्यत्रिभुज हैं उनके फलका योग करनेसे फल मालूम होजाता है ॥ २९ ॥

अनन्तरोक्त क्षेत्रान्तस्त्र्यस्त्रयोः फले ९२४ ।
२३१० अनयोरैक्यम् ३२३४ तस्य फलम् ॥

अबही ऊपर जो विषमचतुर्भुज दिखा आयेहैं उसीके अन्तर्गत जो दो जात्यत्रिभुजहैं उनका फल जोडनेसे विषम चतुर्भुजका फल मिलेगा. जैसे उपरोक्त क्षेत्रमें एक त्रिभुजके दोनो भुज तो



४० और ५१ हैं. और भूमि ७७ है. लम्ब २४ है. इसका "लम्बगुणं भूम्यर्द्धं स्पष्टं त्रिभुजे फलं भवति" इस रीतिसे फल जाननेके लिये भूमि ७७के आधे $\frac{७७}{२}$ ६० को लम्ब २४ से गुणा किया तब ९२४ हुए. यही फल हुआ. इसी प्रकार दूसरे त्रिभुजमें भुज ६८ और ७५

है. भूमि ७७ लम्ब ६० है. यहां भी उसीरीतिके अनुसार भूमिके आधे $\frac{७७}{२}$ को लम्ब ६० से गुणा किया तब २३१० हुए. यही फल है. इन दोनो विषमचतुर्भुजान्तर्गत जात्यत्रिभुजोंके फलों ९२४ । २३१०का योग किया तब ३२३४ हुए यही ऊपर कहेहुए नियमके अनुसार विषमचतुर्भुजका फल हुआ ॥

समानलम्बस्याबाधादिज्ञानायकरणसूत्रं वृत्तद्वयम्.

जो समानलंब विषमचतुर्भुजक्षेत्रमें आबाधा आदि जाननेकी रीति दो श्लोकमें.

समानलम्बस्यचतुर्भुजस्यमुखोनभूमिंपरिकल्प्य भूमिम् ॥ भुजौभुजौ त्र्यस्रवदेवसाध्येतस्याबधे लम्बमितिस्ततश्च ॥ ३० ॥ अबाधयोना चतुरस्र भूमिस्तल्लम्ब वर्गैक्यपदं श्रुतिःस्यात् ॥ समान लम्बेलघुदोः कुयोगान्मुखान्यदोः संयुतिरल्पिका स्यात् ॥ ३१ ॥

अन्वयः – समानलम्बस्य । चतुर्भुजस्य । मुखोनभूमिम् । भूमिम् । परिकल्प्य । भुजौ । भुजौ । परिकल्प्य । तस्य । अबधे । त्र्यस्रवत् । एव । प्रसाध्ये । ततः । लम्बमितिः । च । प्रसाध्या ॥ ३० ॥ चतुरस्रभूः । अबाधया । ऊना । कार्य्या । तल्लम्ब वर्गैक्यपदम् । श्रुतिः । स्यात् । समानलम्बे । मुखान्यदोःसंयुतिः । लघुदोःकुयोगात् । अल्पिका । स्यात् ॥ ३१ ॥

अर्थः– समान लंब चतुर्भुजक्षेत्रकी मुखके प्रमाणसे हीन भूमिको भूमि मानै और दोनो भुजोंको भुजा मानै फिर अवबाधा त्रिभुजकी तुल्य साधै. तदनन्तर लम्बप्रमाण साधै. ॥ ३० ॥ चतुर्भुजकी भूमिमें आबाधा घटादेय. जो शेष रहै. उसके वर्गमें लम्बका वर्ग जोडदेय. तब जो अङ्क हों उनका मूल लेय. वही कर्णका प्रमाण होगा. समान

लंबविषमचतुर्भुजमें लघुभुज और भूमिके योगसे बडी भुज और मुखका योग कम होताहै. अन्यथा समानलम्बविषमचतुर्भुज बनता ही नहीं ॥ ३१ ॥

उदाहरणम्.

द्विपञ्चाशन्मितव्येकचत्वारिंशन्मिती भुजौ ॥
मुखन्तु पञ्चविंशत्या तुल्यं षष्ट्या मही किल ॥ २० ॥
अतुल्यलम्बकं क्षेत्रमिदं पूर्वैरुदाहृतम् ॥
षट्पञ्चाशत्त्रिषष्टिश्च नियते कर्णयोर्मिती ॥ २१ ॥
कर्णौ तत्रापरौ ब्रूहि समलम्बञ्च तच्छ्रुती ॥ ८८ ॥

अन्वयः- यत्र । द्विपञ्चाशन्मितव्येकचत्वारिंशन्मिती । भुजौ । पञ्चविंशत्या । तुल्यम् । मुखम् । किल । मही । तु । षष्ट्या । षट्पञ्चाशत् । त्रिषष्टिः । च । कर्णयोः । मिती । नियते । इदम् । पूर्वैः । अतुल्यलम्बकम् । क्षेत्रम् । उदाहृतम् । तथापि । मन्मते । तत्र । अपरौ । कर्णौ । समलम्बम् । तच्छ्रुती । च । ब्रूहि ॥ २० । २१ ॥ ८८ ॥

अर्थः- जिस विषमचतुर्भुजमें ५२ और ३९ प्रमाण तो भुज हैं, २५ प्रमाण मुख है. भूमि ६० है. । ५६ और ६३ प्रमाण दोनो नियत कर्ण है. इस क्षेत्रको प्राचीनोनें समलंब नहीं कहाहै. तथापि भास्कराचार्य्यके मतसे उसी क्षेत्रमें दूसरे कर्ण और समानलम्ब तथा उस कर्णोंका प्रमाणभी कहो ॥ २० ॥ २१ ॥ ८८ ॥ आशय यह है कि इस क्षेत्रमें प्राचीन लोग ५६ और ६३ को नियत कर्ण बतातेहैं. और यहभी कहतेहैं कि, इसमें समान लम्बभी नहीं होते. परन्तु भास्कराचार्य्य इनकर्णोंसेंभी दूसरे कर्ण लातेहैं. और इसी क्षेत्रमें समान लम्बभी लातेहैं. और भुजोंमें कुछ विकारभी नहीं होता. अर्थात् अक्षेत्रभी नहीं होता.है ॥

न्यासः ।



अत्र बृहत्कर्णं त्रिषष्टिमितं प्रकल्प्य ज्ञातः प्राग्वदन्यः कर्णः ५६ ॥



अथ षट्पञ्चाशत्स्थाने द्वात्रिंशन्मितं कर्णं प्रकल्प्य प्राग्वत्साध्यमाने जातं करणीखण्डद्वयम् ६२१।२७०० अनयोर्मूलया २४ ३३/२५ ५१ २४/२५ ऐक्यं ७६ २२/२५ द्वितीयः कर्णः

फैलाव—— इस चतुर्भुजक्षेत्रमें दोनों भुज ३९।५२ हैं. मुख २५ हैं.



भूमि ६० है. और बडा कर्ण कल्पना किया ६३ इसको इष्ट मान पहले कहीहुई रीतिसे दूसरा कर्ण लाये तो ५६ मिले ॥

जब ५६ के स्थानमें कर्णका प्रमाण ३२ कल्पना किया तब पहले कहीहुई रीतिके अनुसार दूसरे कर्णके वर्गरूप खण्ड ६२१।२७०० दो पाये. इनका मूल नहीं मिल सक्ता इस कारण यह करणीगत कर्ण रहा. परन्तु पहले कहीहुई " वर्गेण महतेष्टेनेत्यादि " रीति आसन्न मूल लिये. तब प्रथम खण्डका मूल २४ ३३/२५ मिला और दूसरे खण्ड २७०० का मूल ५१ २४/२५ मिला. दोनो २४ ३३/२५ ५१ २४/२५ का योग किया तब ७६ २२/२५ हुए. यही दूसरे कर्णका कुछ न्यूनाधिक प्रमाण है. और इस क्षेत्रमें भुज वही रहे.





न्यासः

अथ तदेव क्षेत्रं त्र्यस्त्रसमलंबं. तदा मुखोनभूमिं परिकल्प्य भूमिमितिज्ञानार्थं त्र्यस्रं कल्पितम् ॥



अत्राबधे जाते $\frac{३}{५}$ $\frac{१७२}{५}$ लम्बश्च करणीगतोजातः ३८ $\frac{६२२}{६२५}$ अयं तत्र चतुर्भुजसमलम्बः लब्धो बाधोनितेभूमेः समलम्बस्यच वर्गयोगः ५०४९ अयं कर्णवर्गः । एवं बृहदाबाधातो द्वितीयकर्णवर्गः २१७६ अनयोरासन्नमूलकरणेन जातौ कर्णौ ७१ $\frac{१}{२०}$ ४६ $\frac{१३}{२०}$ एवं चतुरस्रे तेष्वेव बाहुष्वन्यौ कर्णौ बहुधा भवतः । एवमनियतत्वेऽपि नियतावेवकर्णावानीतौ ब्रह्मगुप्ताद्यैः ॥

फैलाव- जब उसी क्षेत्रको समलम्ब बनाया तब पहले कहीहुई रीतिके अनुसार अर्थात् पहले यह कह आये है कि जो समलम्ब विषमचतुर्भुज क्षेत्रहै उसके मुखको भूमिमें घटादेय. तब जो शेष रहै उसको भूमि जानै और दोनो भुजोंको भुज मानै. इस रीतिसे एक त्रिभुज बनाजायगा तब पहले कहीहुई रीतिके अनुसार लम्ब लावै. इसरीतिके अनुसार मुख २५ को भूमि ६० में घटाया तब ३५ रहे इनको भूमि माना. और दोनों भुजोंको भुज माना और लम्बभी वही रहा. तब क्षेत्रका स्वरूप त्रिभुज होगया वह यहहै.——



अब यहाँ पहले कहीहुई "त्रिभुजे भुजयोरित्यादि" रीतिसे आबाधा लाये तब $\frac{३}{५}$ $\frac{१७२}{५}$ मिली. इनसे लंब साधा तब हुआ ३८ $\frac{६२२}{६२५}$ यह करणीगतहै. यही उस चतुर्भुजमें समलंब है. जब विषमचतुर्भुजमें यह समलम्ब पडताहै तब उसक्षेत्रका स्वरूप ऐसा होताहै. अब यहां कर्ण जाननेके लिये पहले कहीहुई रीतिके अनुसार छोटी आबाधा $\frac{३}{५}$ को भूमिमेंसे घटाया तब $\frac{२९७}{५}$ शेष रहे. इनके वर्ग $\frac{८८२०९}{२५}$ में लम्बके वर्ग $\frac{३८०१६}{२५}$ को $\frac{३}{५}$



जोडा तब $\frac{१२६२२५}{२५}$ हुए. वहाँ अंशमें छेदका भाग देनेसे मिले-
५०४९ इसका ठीक मूल नहीं मिलता. परन्तु आसन्नमूल लिया तब



७१ $\frac{१}{२०}$ मिले. यह एक कर्ण हुआ. यह छोटी आबाधाकी ओरके लम्बके शिरसे लग रहाहै. इसी प्रकार दूसरी आबाधाको भूमिमें घटा. पूर्वोक्त क्रिया करनेसे दूसरे कर्णका प्रमाण ४६ $\frac{१३}{२०}$ हुआ. । इसप्रकार समलम्ब विषमचतुर्भुजमें अनेक प्रकारके कर्ण होसक्तेहैं. इस प्रकार यद्यपि कर्ण अनियत हैं तथापि ब्रह्मगुप्त आदि प्राचीनोंने नियतही कर्ण मानेहैं:-

तदाऽऽनयनं यथा— ब्रह्मगुप्त आदिकोनें जिसप्रकार नियत कर्ण मानेहैं, सो साधते हैं:-

कर्णाश्रितभुजघातैक्यमुभयथान्योन्यभाजितं गु-
णयेत् ॥ योगेन भुजवधयोः कर्णौ पदे विषमे ३२

अन्वयः- विषमे । उभयथा । कर्णाश्रितभुजघातैक्यम् । भुजप्रतिभुजवधयोः । योगेन । गुणयेत् । तत् । अन्योन्यभाजितम् । कुर्य्यात् । तदा । उभयत्र । फलयोः । पदे । कर्णौ । स्तः ॥ ३२ ॥

अर्थः- विषमचतुर्भुजमें दोनो ओरसे कर्णको स्पर्श करनेवाली दोनो भुजाओंके घातका योगकर उसको भूमि और मुखके घातसें दोनो भुजोंका घात जोडकर जो अङ्क हों उनसे अलग अलग गुणा करै. तब जो दोनो स्थानमें गुणनफल हों उनमें विनगुऐं उनही अङ्कोंका परस्पर भाग देय तब जो दोनो स्थानमें फल हों उनका मूल लेय तब दोनो कर्णलब्धि होतेहैं ॥ ३२ ॥

कर्णाश्रित भुजघातेति एकवारमनयो २५ ।३९ र्घातः

न्यासः



१७५ तथा ५२।६० अनयोर्घातः ३१२० घातयोर्द्वयोरैक्यम् ।४०९५ तथा द्वितीयवार २५।५२ मनयोर्घातेजातं १३०० तथा द्वितीयवार ३९।६० मनयोर्घाते २३४० घातयोर्द्वयोरैक्यम् ३६४० एतदैक्यं भुजप्रतिभुजः ५२।३९ घातः २०२८ पश्चात् २५।६० अनयोर्वधः १५०० तयोरैक्यं ३५२८ अनेनैक्येन ३६४० गुणितं जातं पूर्वैक्यम् १२८४१९२० प्रथमकर्णाश्रितभुजघातैक्येन ४०९५ भक्तं लब्धम् ३१३६ अस्यमूलम् ५६ एककर्णः ॥ तथा द्वितीयकर्णार्थं प्रथमकर्णाश्रित भुजघातैक्यम् ४०९५ भुजप्रतिभुजवधयोगः३५२८ गुणितं जातम् १४४४७१६० अन्यकर्णाश्रितभुजघातैक्येन ३६४० भक्तं लब्धम् ३९६९ अस्यमूलम् ६३ द्वितीयः कर्णः। अस्मिन् विषये क्षेत्रकर्णसाधनम् । अस्य कर्णाऽऽनयनस्य प्रक्रियागौरवम् ॥

फैलाव- ऊपर कहीहुई रीतिके अनुसार प्राचीनोंके मतसे नियतकर्णलानेके लिये यहां जो दो त्रिभुज बनगये हैं उनमेंसे एकवार एक त्रिभुजके दोनों भुजों ३९।२५ का घात किया तब ९७५ हुए. और दूसरे त्रिभुजके दोनो भुजों ५२।६० का घात किया तब ३१२० हुए. इन दोनो घातों ९७५।३१२० का योग किया तब ४०९५



हुए. फिर दूसरा कर्ण डाला तब एक त्रिभुजके भुजों २५। ५२ का घात किया तब १३०० हुए. तथा दूसरे त्रिभुजके भुजों ३९। ६० का घात किया तब २३४० हुए. इन दोनो घातों १३००। २३४० का योग किया तब ३६४० हुए. इस प्रकार ४०९५। ३६४० यह दो घात योग हुए. इन्हे तो अलग लिखा. फिर भूमि और मुख ६०। २५ का घात किया तब १५०० हुए. तदनन्तर दोनो भुजों ३९। ५२ का घात किया तब २०२८ हुए. इन दोनो भुजप्रतिभुज योगों १५०० । २०२८ को जोडा तब ३५२८ हुए. इनसे पहले दोस्थानमें लिखेहुए अङ्को ४०९५। ३६४० से गुणाकिया तब क्रमसे दोनोंका गुणनफल १४४४७१६० । १२८४१९२० हुए. इनमें अलग लिखे हुए दुसरे अङ्क ३६४० का पहले गुणनफल १४४४७१६० में भाग दिया तब ३९६९ मिले. इनका मूल लिया तब मिले ६३ फिर अलग लिखेहुए पहले अङ्कों ४०९५ का दूसरे गुणनफल १२८४। १९२० में भाग लिया तब ३१३६ मिले. इनका मूल लिया तब ५६ मिले. यही दोनों कर्णों ६३। ५६ का प्रमाण है ॥

लघुप्रक्रियाप्रदर्शनद्वारेणाह – उनहीं नियत कर्णोंके लानेकी रीति अतिलघुप्रक्रियाके द्वारा दिखाते हैं.-

अभीष्टजात्यद्वयबाहुकोटयः परस्परं कर्णहता भुजाइति ॥ चतुर्भुजं यद्विषमं प्रकल्पितं श्रुती तु तत्र त्रिभुजद्वयात्ततः ॥ ३३ ॥ बाह्वोर्वधः कोटिवधेन युक्तस्यादेका श्रुतिः कोटिभुजावधैक्यम् ॥ अन्या लघौ सत्यपि साधनेऽस्मिन्पूर्वैः कृतं यद्गुरु तन्न विद्मः ॥ ३४ ॥

अन्वयः- यत् । विषमम् । चतुर्भुजम् । प्रकल्पितम् । तत्र । तत्र । श्रुती । तु । त्रिभुजद्वयात् । सुखेन । स्याताम् । अभीष्टजात्यद्वयबाहु

कोटयः । परस्परकर्णहताः । भुजाः । भवन्ति । ततः । कोटिवधेन । यु-क् । बाह्वोः । वधः । एका । श्रुतिः । स्यात् । कोटिभुजा । वधैक्यम् । अन्या । श्रुतिः । स्यात् । इति । अस्मिन् । लघौ । साधने । सति । अपि । पूर्वैः । यत् । गुरु । कृतम् । वयम् । तत् । न । विद्मः ॥३३।३४॥

अर्थः- जो एक विषम चतुर्भुज कल्पना कियाहै. तहां अभीष्ट जो दो जात्यत्रिभुज है. उनकी भुजकोटिका घात भुज होतेहैं. अर्थात् एक त्रिभुजके भुजसे दूसरे त्रिभुजके कर्णको गुणा करै तब जो अङ्क हों, सोई विषमचतुर्भुजके एक भुजका प्रमाणहै. दूसरे त्रिभुजके भुजसे पहलेके कर्णको गुणा करनेपर जो अङ्क हों, वही दूसरे भुजका प्रमाणहै. पहले त्रिभुजकी कोटिसे दूसरेके कर्णको गुणा करनेसे जो अङ्क हों, वह तीसरे भुजका प्रमाण होगा. । तथा दूसरे जात्यकी कोटिसे पहलेकेकर्णको गुणा करनेपर जो अङ्क हों, वह चौथे भुजका प्रमाण होताहै तदनंतर दोनों त्रिभुजोंके भुजोंके घातमें कोटियोंका घात जोडनेसे जो अंक हों वह एक कर्णका प्रमाण हों पहले जात्यकी कोटि और दूसरेके भुजका घात और दूसरेकी कोटी पहले भुजको घातका योग करनेसे जो अङ्क हों वह दूसरे कर्णका प्रमाण होताहै. इसप्रकार दोनो त्रिभुजोंसे सुखसे अनायास कर्ण सिद्ध होजातेहै. इस सरल रीतिके होनेपर भी ब्रम्हगुप्त आदि आचार्योंनें जो अतिविस्तार युक्त रीति नियत कर्ण लानेकी लिखी है. सो हम नहीं जानते कि क्यों बनाईहै. ॥ ३३ ॥ ३४ ॥ यह प्राचीनोपर भास्कराचार्य्यका आक्षेपहै.

जात्यक्षेत्रद्वयम् न्यासः



एतयोरितरेतरकर्णहता भुजाः कोटयः । इतरेतर कर्णहताः कोट्यो भुजा इतिकृते जातं

२५ । ६० । ५२ । ३९ तेषां महती भूः । लघुमुख म् । इतरौ बाहू । इति प्रकल्प्य क्षेत्रदर्शनम् । इमौ कर्णौ महताऽऽयासेनानीतौ ६३ । ५६ अस्यैव जात्यद्वयस्योत्तरोत्तर भुजकोट्योर्घातौ जातौ ३६ । २० अनयोरैक्यमेकः कर्णः ५६ बाह्वोः ३ । ५ कोट्योश्च ४ । १२ घातौ १५ । ४८ अनयोरैक्यमन्यः कर्णः ६३ । एवं श्रुती स्यातामिति सुखेन जाते ॥

फैलाव- पहले कहे हुए क्षेत्रको दो जात्य त्रिभुजकरके सिद्ध करतेहैं. इन दोनो क्षेत्रोंके भुजसे कर्णको कर्णसे भुजको "अभीष्टजात्यद्वयेत्यादि" रीतिसे परस्पर गुणा किया. अर्थात् एक त्रिभुजके



भुज ३ से दूसरेके कर्ण १३ को गुणा किया तब ३९ हुए. यह उसी विषम चतुर्भुजमें एकभुजका प्रमाण है. फिर दूसरेके भुज ५ से पहलेके कर्ण ५ को गुणा किया तब २५ हुए. यही वहां दूसरा भुज है. फिर पहलेकी कोटि ४ से दूसरेके कर्ण १३ को गुणा किया तब ५२ हुए. यही वहां तीसरा भुज है. तदनन्तर दूसरेकी कोटि १२ से पहलेके कर्ण ५ को गुणा किया तब ६० हुए. यही वहां चौथा भुज है. इसप्रकार चारों ३९ । २५ । ५२ । ६० भुज सिद्ध हो जातेहैं. इनमें जो सबसे अधिक अङ्क ६० है. वह भूमिका प्रमाण है. और सबसे कम अङ्क २५ है. वह मुखका प्रमाण है. शेष दोनो ३९ । ५२ भुजोंके प्रमाण है. इसप्रकार यदि विषमचतुर्भुज बनायागया तब वही पूर्वोक्त बनगया. यहां यह ६३ । ५६ दोनो कर्ण प्राचीनोंने बडे गौरवसे सिद्ध कियेहैं. परन्तु हम इनही दोनों कर्णों को

अति सरल रीतिसे लातेहैं. इनही दोनो जात्यत्रिभुजोंके भुज और कोटियोंका उत्तरोत्तर घात किया. अर्थात् पहलेका भुज ३ और दूसरेकी कोटि १२ का घात किया, तब ३६ हुए. और पहलेकी कोटि ४ और दूसरेका भुज ५ इनका घात किया तब २० हुए. इन दोनो गुणनफलों ३६ । २० को जोडा तब ५६ हुए. यही पहला कर्ण है. फिर दोनो भुजोंके घात और दोनोंकी कोटियोंके घातका योग किया जैसे दोनोंकी भुजों ३।५ का घात किया तब १५ हुए. दोनोंकी कोटियों ४।१२ का घात किया तब ४८ हुए. इन दोनो भुजघात १५ और कोटि घात ४८ का योग किया तब ६३ हुए. यही दूसरे कर्णका प्रमाण है. इस प्रकार अनायास लघु रीतिसे वही दोनो ६३ । ५६ लब्ध होगये.

अब इसी विषमचतुर्भुजसे उनदोनो जात्यत्रिभुजोंके निकालनेकी रीति लिखतेहैं. जिनसे यह विषम बनाथा.

किसी कर्णअङ्कका अर्थात् दो अङ्कोंके वर्गयोगके मूलका मुख और भूमिमें अर्थात् सबसे छोटे और सबसे बडे भुजमें भाग देय. तब जो लब्धि मिले वही भुज और कोटि है. फिर इनही लायेहुए भुज और कोटिसे कर्णका प्रमाण पहले कही हुई " तत्कृत्योर्योगपदं कर्णः " इस रीतिसे लावे. और इसी लायेहुए कर्णका विषमचतुर्भुजके बाकी बचे दोनो भुजोंमें भाग देय. तब जो लब्धि मिले वह दूसरे त्र्यस्रके भुजकोटिका प्रमाण होगा. यह वही दूसरा क्षेत्र है. कि जिसके कर्णका भूमि और मुखमें भाग दिया था अर्थात् पहले माना

हुआ कर्णही दूसरे क्षेत्रका कर्ण होताहै. वही क्षेत्रपर दिखातेहैं.

यहां पहले पांच ५ को कर्ण माना. इसका सबसे छोटे भुज २५ में भाग दिया तब ५ मिले. और

सबसे बडे ६० में भाग दिया तब १२ मिले. यही एक जात्यत्रिभुजके भुज ५ कोटि १२ हुए. इनही ५।१२ से कर्ण लानेके लिये "तत्कृत्योरित्यादि" रीतिके अनुसार दोनो ५।१२के वर्गों २५। १४४ का योग किया तब १६९ हुए. इनका मूल लिया तब १३ मिले. यही कर्णका प्रमाण है. इस प्रकार एक जात्यत्रिभुज बनगया. तदनन्तर विषमचतुर्भुजके शेष बचे हुए दोनो भुजों ३९।५२ में अबही लायेहुए कर्ण१३ का भाग दिया तब ३ और ४ लब्धि हुए. यही दूसरे त्र्यस्त्रभुजकोटिका मानहै. इसका कर्ण तौ वही ५ है. जो कि प्रथमही माना था और जिसका मुख तथा भूमिमें भाग दियाथा. इसप्रकार दूसरा जात्यभी बनगया. ॥



अथ यदि पार्श्वभुजमुखयोर्व्यस्तं कृत्वा न्यस्तं क्षेत्रं तदा न्यासः



तदा जात्यद्वयकर्णयोर्वधः ६५ द्वितीयः कर्णः ॥

फैलाव- अब यदि इसी क्षेत्रके मुख भूमिमेंसे एक एकको भुजोंसे पलटा जैसे मुख२५को भुज३९के स्थानमें रखा और ६०को ५२के स्थानमें रखा. तब जहां कर्ण ६३ आताथा. तहां दोनो जात्योंके कर्णोंका घात फल होताहै. तहां ५६का कर्ण तौ पहली ही रीतिसे लाये. और दूसरा कर्ण लानेके अर्थ दोनो जात्योंके कर्णों ५।१३ का घात किया तब ६५ हुए. यही दूसरे कर्णका प्रमाण हुआ. अर्थात् केवल दूसरा कर्णही बदलगया. ॥



अथ सूचीक्षेत्रोदाहरणम्- अब सूचीक्षेत्रका उदाहरण लिखतेहैं:-

क्षेत्रे यत्र शतत्रयं (३००) क्षितिमितिस्तत्त्वेन्दु (१२५) तुल्यंमुखं बाहू खोत्कृतिभिः (२६०) शराति (१९५) धृतिभिस्तुल्यौच तत्रश्रुती ॥ एकाखाष्टयमैः (२८०) समातिथि (३१५) गुणै रन्याथ तल्लम्बकौ तुल्यौ गोधृतिभि (१८९) स्तथाजिनयमै (२२४) र्योगाच्छ्रुवोलम्बयोः ॥ २२ ॥ तत्खण्डे कथयाधरे श्रवणयो र्योगाच्च लम्बाबधे तत्सूची निजमार्गवृद्धभुजयो र्योगाद्यथा स्यात्ततः ॥ साबाधंवद लम्बकंचभुजयोः सूच्याः प्रमाणे च के सर्वगाणितिक! प्रचक्ष्वनितरां क्षेत्रेऽत्र दक्षोऽसि चेत् ॥ २३ ॥

अन्वयः- यत्र । क्षेत्रे । क्षितिमितिः । शतत्रयम् । मुखम् । तत्त्वेन्दुभिः । तुल्यम् । खोत्कृतिभिः । शरातिधृतिभिः । च । तुल्यौ । बाहू । तत्र । श्रुती । खाष्टयमैः । समा । एका । तिथिगुणैः । समा । अन्या । अथ । गोधृतिभिः । तथा । जिनयमैः । तुल्यौ । तल्लम्बकौ । तत्र । श्रवोलम्बयोः । योगात् । अधरे । तत्खण्डे । श्रवणयोः । योगात् । लम्बाबधे । च । कथय । तत्सूचीनिजमार्गवृद्धियोगात् । यथा । स्यात् । तथा । ततः । साबाधम् । लम्बकम् । वद । सूच्याः । भुजयोः । प्रमाणे । च । के । हेगाणितिक! । चेत् । अत्र । क्षेत्रे । नितराम् । दक्षः । असि । तर्हि । पूर्वोक्तम् । सर्वम् । प्रचक्ष्व ॥ २२ ॥ २३ ॥ ऽऽ ॥

अर्थः- जिस क्षेत्रमें भूमिका प्रमाण ३०० तीनसौ है. मुखका प्रमाण १२५ एकसौ पचीसहै। खकहिये ० शून्य उत्कृति कहिये २६ छब्बीस अर्थात् २६० दोसौ साठ एक भुजका प्रमाणहै। और शर

कहिये. ५ अतिधृति कहिये १९ उन्नीस अर्थात् १९५ एकसौ पिचानवे दूसरे भुजका प्रमाण है. तहां एक कर्णका प्रमाण ख कहिये ० शून्य अष्ट ८ आठ यम कहिये २ दो अर्थात् २८० दोसौ अस्सीकी तुल्य है. और दूसरा कर्ण तिथि कहिये १५ गुण कहिये ३ अर्थात् ३१५ तीनसौ पन्द्रहकी तुल्य है. और छोटे भुजके शिरसे जो लम्ब डाला उसका प्रमाण गो कहिये ९ और धृति कहिये १८ अर्थात् १८९ एकसौनवासीके तुल्यहै. तथा बडे भुजके शिरसे जो लम्ब डाला उसका प्रमाण जिन कहिये. २४ चौवीस और यम कहिये २ दो अर्थात् २२४ दोसौ चौवीसके तुल्यहै. तहां कर्ण और लम्बके योगसे उसके नीचे के जो दोखण्ड हैं उनके प्रमाण और कर्णोंके योगसे जो लम्ब डाला है उसका प्रमाण और उसी लम्बकी आबाधाभी कहो और जो पहले भुज कहेहैं जिसप्रकार उनको अपने मार्गसे सूधा बढाकर दोनोंके योगसे बनजाय. फिर उस सूचीके अग्रभागसे लंबडालकर उसलंबका प्रमाण तथा उसलम्बकी आबाधाओंका प्रमाणभी कहोतथा हे गणितके जाननेवाले! सूचीभुजकाप्रमाणभीक्याहोगा सो कहो? यदि इसक्षेत्रमें प्रवीण हो तौ जो जो प्रश्न कियाहै वह सब कहो ॥२२॥२३॥८८॥

भूमानं ३००
मुखम् १२५
बाहू २६०।१९५
कर्णौ २८०।३१५
लम्बौ १८९।२२४



फैलाव- यहां भूमिका प्रमाण ३०० है. मुखका प्रमाण १२५ है. दोनो भुजोंका प्रमाण २६०।१९५ है. दोनो कर्णोंका प्रमाण २८०।३१५ है. डालेहुए दोनो लम्बोंका प्रमाण १८९। २२४ है. उसीका स्वरूप दिखातें है. यहहै—



अथ सन्ध्याद्यानयनाय करणसूत्रंवृत्तद्वयम् —

अब संधि-पीठ-कर्ण-नीचेके खण्ड लानेकी रीति लिखते हैं श्लो.२

लम्बतदाश्रितबाह्वो र्मध्यं संध्याख्यमस्यलम्बस्य।
सन्ध्यूनाभूः पीठं साध्यंयस्याधरं खण्डम् ॥३५॥

अन्वयः- लम्बतदाश्रितबाह्वोः। मध्यम्। अस्य। लम्बस्य। सन्ध्याख्यम्। सन्ध्यूना। भूः। पीठम्। यस्य। अधरम्। खण्डम्। साध्यम् ॥३५॥

अर्थ- लम्ब और लम्बको स्पर्श करनेवाली भुज इनके मध्यका भाग इसी लंबकी संधि कहलाता है.। भूमिमें संधि घटानेसे शेषकी पीठ संज्ञाहै. जिसका कि अधर खण्ड साधना है. ॥३५॥

सन्धिर्द्विःस्थः परलम्बश्रवणाहतः परस्यपीठेन।
भक्तो लम्बश्रुत्योर्योगात्स्याताम धः खण्डे ॥३६॥

अन्वयः- द्विःस्थः। सन्धिः। परलम्बश्रवणाहतः। कार्य्यः। ततः। परस्य। पीठेन। भक्तः। कार्य्यः। तदा। लम्बश्रुत्योः। योगात्। अधः खण्डे। स्याताम् ॥३६॥

अर्थः— सन्धिको दो स्थानमें लिखै. एकस्थानमें परलंबसे गुणा करे. और दूसरे स्थानमें निजकर्णसे गुणा करे. तदनन्तर दोनो स्थानमें परपीठका भाग देय. तब लम्ब और कर्णके योगसे नीचेके खण्ड होतेहैं ॥३६॥

न्यासः। लम्बः १८९ तदाश्रितभुजः १९५ ।

अनयोर्मध्ये "यल्लम्बलम्बाश्रितबाहुवर्गे" त्यादिना गताबाधासन्धिसंज्ञा ४८ तदूनितभूरिति द्वितीयाबाधा सापीठसंज्ञा २५२ एवंद्वितीयलम्बः २२४ तदाश्रित भुजः २६० पूर्ववत्सन्धिः १३२ पीठम् १६८ अथाद्य लम्बस्याधः १८९ खण्डंसाध्यम् । अस्यसन्धिः ४८ ह्रिस्थः ४८ परलम्बेन २२४ श्रवणेनच २८० पृथग्गुणितः १०७५२ । १३४४० परस्यपीठेन १६८ भक्तो लब्धंलम्बाधःखण्डम् ६४ श्रवणाधःखण्डञ्च८० एवंद्वितीयलम्बस्य २२४ सन्धिः १३२ परलम्बेन १८९ करणेनच ३१५ पृथग्गुणितः परस्यपीठेन २५२ भक्तोलम्बाधःखण्डम् ९९ श्रवणाधः खंडंच १६५॥

फैलाव– ऊपर दिखाये हुए क्षेत्रमें सन्धि अर्थात् लम्ब और लम्बको आश्रय करनेवाली भुजके मध्यका प्रमाण जाननेके निमित्त ऊपरोक्त नियमानुसार लम्ब १८९ और उसी लम्बको आश्रय करनेवाले भुज १९५ इन दोनोंके मध्यका प्रमाण "यल्लम्बलम्बाश्रितवर्गेत्यादि" रीतिके अनुसार लम्ब१८९ और भुज १९५ इन दोनोका वर्ग किया तब ३५७२१।३८०२५ हुए. इनका अंतर किया तब २३०४ बचे. इनका आसन्नमूल लिया तब ४८ मिले यही पहली सन्धि हुई. इसको भूमि ३००में घटाया तब २५२ बचे. इसीकानाम पीठहै. इसी प्रकार दूसरा लम्ब २२४ और उसकी ओरकी भुज २६० है. इन दोनोंका वर्ग किया तब५०१७६। ६७६०० हुए. इनका अंतर किया तब १७४२४ बचे. इनके मूल लिया तब १३२ मिले. यही इस लम्बकी ओरकी सन्धि है. इसको भूमि ३००में घटाया तब १६८ मिले. यही इस सन्धिका पीठ है. जो लम्बके सम्पातसे नीचेको लम्बका नीचेका खण्ड है. उसके जानने-के निमित्त ऊपर कही हुई "सन्धिर्द्विस्थ" इत्यादि रीतिके अनुसार

पहले लम्बका नीचेका खण्ड जानताहै. इसकारण पहले लम्बके१८९ सन्धि ४८को दो स्थानमें लिखा. एक स्थान परलम्ब २२४ से गुणा किया तब १०७५२ हुए. दूसरे स्थानमें अपने कर्ण २८० से गुणा किया तब १३४४० हुए. इन दोनों १०७५२ । १३४४० स्थानमें परलम्बके पीठ १६८ का भाग लिया तब क्रमसें लम्बके नीचेके खण्डका प्रमाण ६४ और कर्णके नीचेके खण्डका प्रमाण ८० मिला. इसी

सोई क्षेत्रका स्वरूप दिखाते हैं.



प्रकार दूसरे लम्ब २२४का सन्धि १३२है. इसको दो स्थानमें लिखकर एक स्थानपर १८९ लम्बसे गुणा किया तब २४९४८ हुए. और दूसरे स्थानमें अपने कर्ण ३१५ सें गुणाकिया तब ४१५८० हुए. इन दोनों २४९४८ । ४१५८० स्थानोंमें परपीठ २५२ का भाग दिया तब क्रमसें इस लम्बके नीचेके खण्डका प्रमाण ९९ और कर्णके नीचेके खण्डका प्रमाण १६५ मिला ॥

अथकर्णयोर्योगादधोलम्बज्ञानार्थसूत्रंवृत्तम्-

दोनोंकर्णोंके योगसे नीचेका लंब लानेकी रीति एक श्लोकमें.

लम्बौ भूघ्नौ निजनिजपीठविभक्तौ चवंशौ स्तः ॥
ताभ्यां प्राग्वच्छ्रुत्योर्योगाल्लम्बः कुखण्डेच ॥ ३७ ॥

अन्व०- भूघ्नौ। लम्बौ । निजनिजपीठविभक्तौ । च। वंशौ। स्तः। ताभ्यां । श्रुत्योः। योगात्। लम्बः । कुखण्डे। च । प्राग्वत् । साध्ये ॥ ३७

अर्थः- दोनों लंबोंको भूमिसें गुणा करै. और दोनोंमें अपने २ पीठका भाग देय. तब वंशोंका प्रमाण मिलताहै. इनही वंशोंसे कर्णोंके योगसें पहलेकी तुल्य लंब और दोनों भूखण्ड साधै. ॥३७॥

लम्बौ १८९।२२४। भू ३०० घ्नौजातौ ५६७००। ६७२०० स्वस्वपीठाभ्याम् २५२।१६८ भक्तौ। एवमत्र लब्धौ वंशौ २२५।४००। आभ्यामन्योन्यमूलाग्रगसूत्रयोगादित्यादिकरणेन लब्धः कर्णयोगादधोलम्बः १४४ भूखण्डे च १०८।१९२॥

फैलाव– ऊपर दिखाये हुए क्षेत्रमें नीचेका लम्ब और भूखण्ड जाननेकी आवश्यकता है. इसकारण वंशोंका प्रमाण जाननेके निमित्त ऊपर कहीहुई " लम्बौभूघ्नावित्यादि " रीतिसे दोनों लंबों १८९।२२४ को भूमि ३०० से गुणा किया तब ५६७००। ६७२०० हुए. इनमें अपने अपने पीठका भाग दिया अर्थात् ५६७०० में अपने पीठ २५२ का भाग दिया तब २२५ लब्धि हुए. यह पहले लम्बकी ओरका वंश है. फिर ६७२०० में अपने पीठ १६८ का भाग दिया तब ४०० लब्धि हुए. यह दूसरे लम्बकी ओरका वंश है. अब इन वंशोंको जानकर पहले कही हुई " अन्योन्यमूलाग्रगसूत्रयोगाद्वेण्वोर्वधे योगहृतेऽवलम्बः " इसरीतिके अनुसार वंशों २२५।४०० का घात किया तब ९०००० हुए. इन्में वंशोंके योग ६२५ का भाग दिया. तब १४४ लब्ध हुए. यही कर्णयोगसे नीचे डाले हुये लम्बका प्रमाण है. अब इसी लम्बकी आबाधा जाननेके निमित्त पहले कहीहुई " वंशौ स्वयोगेनहृताभीष्टभूघ्नौच लम्बोभयतः कुखण्डे " इसरीतिके अनुसार दोनों वंशों २२५।४०० को अभीष्ट

सोई क्षेत्रका स्वरूप दिखाते हैं.



भू ३०० से गुणा किया तब ६७५००। १२०००० हुए. इनमें अपनेयोग

६२५ का भाग दिया तब क्रमसे भूखण्डोंका प्रमाण १०८। १९२ मिला. यहां १०८ पहले वंशकी ओरका भूखंड है. १९२ दूसरे वंशकी ओरका भूखण्डहै. वही क्षेत्रका स्वरूप दिखाया है.

अथ सूच्याबाधालम्बभुजज्ञानार्थं सूत्रं वृत्तत्रयम्.

अब सूचीका आबाधा, लब तथा भुज जाननेके निमित्त रीति तीन श्लोकमें.

लम्बहृतोनिजसन्धिः परलम्बगुणः समाह्वयोज्ञेयः।
समपरसन्ध्योरैक्यं हारस्तेनोद्धृतौ तौ च ॥ ३८ ॥
समपरसन्धी भूघ्नौ सूच्याबाधे पृथक् स्याताम् ॥
हारहृतःपरलम्बः सूचीलम्बो भवेद्भूघ्नः ॥ ३९ ॥
सूचीलम्बघ्नभुजौ निजनिजलम्बोद्धृतौभुजौसूच्याः ॥
एवंक्षेत्रक्षोदः प्राज्ञैस्त्रैराशिकात् क्रियते ॥ ४० ॥

अ० - निजसन्धिः। लम्बहृतः। परलम्बगुणः। समाह्वयः। ज्ञेयः। समपरसन्ध्योः। ऐक्यम्। हारः। तौ। समपरसन्धी। भूघ्नौ। तेन। उद्धृतौ। च। पृथक्। सूच्याबाधे। स्याताम्। परलम्बः। भूघ्नः। हारहृतः। सूचीलम्बः। भवेत्। सूचीलम्बघ्नभुजौ। निजनिजलंबोद्धृतौ। सूच्याः। भुजौ। स्याताम्। प्राज्ञैः। एवम्। क्षेत्रक्षोदः। त्रैराशिकात्। क्रियते ॥ ३८। ३९। ४० ॥

अर्थः- अपनी सन्धिको परलम्बसे गुणाकर अपने लम्बका भाग देय तब जो लब्धि मिले उसको समनामसे कहतेहैं. सम और परसन्धिका योग करै तब जो अङ्क हों उनकों हार मानै. इस प्रकार दोनो ओरके हर बनावे. फिर सम और परसन्धिको भूमिसे गुणा करै. तब जो अङ्क हों उनमें दोनों स्थानमें उस बनायेहुए हरका भाग देय. तब जो दोनोंकी लब्धि होगी. वही सूची लम्बके दोनो ओरकी आबाधा होगी. परलम्बको भूमिसे गुणा करनेमें जो गुणन फल हो उसमें उसही बनाये हुए हारका भाग देय. तब जो लब्धि हो वही सूची लम्बका प्रमाण होगा.

दोनो भुजोंको सूची लम्बसे गुणा करै. तब जो अङ्क हों उनमें अपने २ लम्बका भाग देय. तब जो लब्धि हों वही सूचीके भुज होंगे. बुद्धिमान् इस क्षेत्रको त्रैराशिकसे भी सिद्ध करतेहैं ॥ ३८ ॥ ३९ ॥ ४० ॥

अत्रकिलाऽयंलम्बः २२४ अस्य सन्धिः १३२ अयं परलम्बेन १८९ गुणितोऽ २२४ नेन भक्तोजातः समाह्वयः $\frac{८९१}{८}$ अस्यपरसन्धेश्च ४८ योगो $\frac{१२७५}{८}$ हारः । अनेनभूघ्नः ३०० समः $\frac{२६७३००}{८}$ परसन्धिश्च $\frac{१४४००}{१}$ भक्तो जाते सूच्याबाधे $\frac{३५६४}{१७}$, $\frac{१५३६}{१७}$ एवंद्वितीयसमाह्वयः $\frac{५१२}{९}$ द्वितीयोहारः $\frac{१७००}{९}$ अनेन भूघ्नः स्वीयः समः $\frac{१५३६००}{९}$ परसन्धिश्च $\frac{३९६००}{१}$ भक्तोजाते सूच्याबाधे- { $\frac{१५३६}{१७}$, $\frac{३५६४}{१७}$ } ॥

परलम्बः २२४ भूमिः ३०० गुणो हारेण $\frac{१७००}{९}$ भक्तो जातः सूचीलम्बः $\frac{६०४८}{१७}$ सूचीलम्बेनभुजौ १९५ । २६० गुणितौ स्वस्वलम्बाभ्यां १८९ । २२४ यथाक्रमं भक्तौजातौ स्वमार्गघ्नौ सूचीभुजौ $\frac{६२४०}{१७}$, $\frac{७०२०}{१७}$ एवमत्र सर्वत्र भागहारराशिंप्रमाणं गुण्यगुणकौतु यथायोग्यं फलेच्छेप्रकल्प्य सुधिया त्रैराशिकमूह्यम्.

फैलाव- सूचीकी आबाधा जाननेके निमित्त ऊपर कहीहुई "लम्बहतो निजसन्धिरित्यादि" रीतिके अनुसार लम्ब २२४ की सन्धि १३२को परलम्ब १८९ से गुणा किया तब २४९४८ इसमें अपने लम्ब२२४का भाग लिया तब $\frac{२४९४८}{२२४}$ हुए. इसमें २८का अपवर्तन दिया तब $\frac{८९१}{८}$ रहे. इसका नाम सम है. इनमें परसन्धि ४८का योग किया तब $\frac{१२७५}{८}$ हुए. इसका नाम हार है. अर्थात् इसको हार कल्पना किया. इसका भूमि ३०० से गुणा कियेहुए सम $\frac{२६७३००}{८}$ में और भूमि ३०० से गुणा किये हुए परसन्धि $\frac{१४४००}{१}$ में भी भाग लिया तब क्रमसें दोनोंकी

$\frac{३५६४}{१७}$ $\frac{१५३६}{१७}$ लब्धि हुई. यही दोनो लब्धियें सूचीकी दोनो आबाधा है. अर्थात् $\frac{३५६४}{१७}$ यह सूचीकी उधरकी आबाधा है. जिधरका समथा. और $\frac{१५३६}{१७}$ यह सूचीकी दूसरी आबाधा हुई. अर्थात् ४८ सन्धिकी ओरकी है. ॥

इसी प्रकार दूसरे लम्ब १८९ की सन्धि १३२ को परलम्ब २२४ से गुणा किया तब २९५६८ हुए. इसमें अपने लम्बका भाग लिया तब $\frac{५१२}{९}$ लब्ध हुए. इसका नाम सम है. इसमें परसन्धिका योग किया तब $\frac{१७००}{९}$ हुए. इसको हार कल्पनाकर इसका भूमि ३०० से गुणा किये हुए निजसम $\frac{१५३६००}{९}$ में और भूमि ३०० से गुणा किए हुए परसन्धि $\frac{३९६००}{१}$ में भी भाग दिया तब क्रमसे दोनोंकी $\frac{१५३६}{१७}$, $\frac{३५६४}{१७}$ लब्धि हुई. यही दोनो लब्धियें सूचीकी दोनों आबाधा हैं. अर्थात् $\frac{१५३६}{१७}$ यह एक ओरकी आबाधा है. और $\frac{३५६४}{१७}$ यह दूसरी ओरकी आबा० है.

अब सूची लम्ब जाननेके निमित्त ऊपर कही हुई "हारहतइत्यादि" रीतिके अनुसार परलम्ब २२४ को भूमिसे गुणा किया तब ५६७०० हुए. इसमें उसी पहले हार $\frac{१२७५}{९}$ का भाग लिया तब $\frac{४५३६००}{१२७५}$ मिले. इसमें ७५ का अपवर्तन दिया. तब $\frac{६०४८}{१७}$ रहे. यही सूची लम्ब का प्रमाण है. दूसरी ओरसे भी यही मिलता है. अब सूची लम्बसे सूचीके भुज जाननेके निमित्त ऊपर कही हुई "सूचीलम्बघ्नभुजा वित्यादि" रीतिके अनुसार सूची लम्ब $\frac{६०४८}{१७}$ से भुज १९५ को गुणा किया तब $\frac{११७९३६०}{१७}$ हुए. इसमें इसी भुजकी ओरके लम्ब १८९ का भाग देनेसे लब्धि हुए. $\frac{६२४०}{१७}$ यही अपने मार्गसे बढा हुआ १८९ लम्बकी ओरका सूचीका भुज है. इसी प्रकार दूसरा सूची भुज $\frac{७०२०}{१७}$ मिला. इन दोनों भुजोंको अपने २ मार्गमें बढानेसे जो दोनों भुजों का योग होनेपर आकार बनजाता है उसीका नाम सूची है. उसी कारण इसको सूचीक्षेत्र कहते हैं. बुद्धिमान यहां ऊपर कही हुई सब

रीतियोंमें हारको प्रमाण और गुण्यको फल तथा गुणकको इच्छा कल्पना करके त्रैराशिकसे भी इस सूचीक्षेत्रको सिद्ध कर सक्ताहै.

सूचीलम्ब और आबाधा लानेका औरभी प्रकार लिखतेहैं.

सन्धिमें अपने २ लम्बका भाग देकर उनका योग करै तब जो अङ्क हों उनका भूमिमें भाग देय. तब जो लब्धि मिले वह सूची लम्बका प्रमाण है. फिर लंबसे त्रैराशिक करके सूचीकी आबाधा और सूची भुजका साधन करै. इसको अभी कहेहुए सूचीक्षेत्रके उदाहरणमेंही दिखातेहैं.

सूचीक्षेत्रका स्वरूप जो कि गणित करनेसे हुआ.



यहाँ एक ओरकी सन्धि ४८है. और लम्ब १८९है. और दूसरी

